## संस्कृतम्–सामान्यम्
## कक्षा – द्वादशी
## ''अपूर्वा''

## प्रश्न–पत्राणाम् अङ्कविभाजनपत्रम् (ब्लू–प्रिंट)
## उच्चतरमाध्यमिकछात्राणां कृते

कक्षा – द्वादशी **XII** पूर्णाङ्काः – 100
विषय – संस्कृतम् (सामान्यम्) समयः – घण्टात्रयम्

| स. क्र. | इकाई | इकाई–अनुसारेण आवंटिताङ्काः | अङ्कानुसारं प्रश्नानां सङ्ख्या | | | | | पूर्णप्रश्नाः |
|---|---|---|---|---|---|---|---|---|
| | | | 01 अंक | 04 अंक | 05 अंक | 06 अंक | 10 अंक | |
| 01 | सन्धिः | 03 | 03 | – | – | – | – | 03 |
| 02 | समासः | 04 | 04 | – | – | – | – | 04 |
| 03 | अव्ययम् | 04 | 04 | – | – | – | – | 04 |
| 04 | धातुरूपाणि | 03 | 03 | – | – | – | – | 03 |
| 05 | प्रत्ययाः | 04 | 04 | – | – | – | – | 04 |
| 06 | पर्याय/विलोम–चयनम् | 03 | 03 | – | – | – | – | 03 |
| 07 | सूक्तिः | 02 | 02 | – | – | – | – | 02 |
| 08 | शब्दरूपाणि | 03 | 03 | – | – | – | – | 03 |
| 09 | युग्म–मेलनम् | 04 | – | 01 | – | – | – | 01 |
| 10 | एकपदेन प्रश्नोत्तराणि | 04 | – | 01 | – | – | – | 01 |
| 11 | एकवाक्येन प्रश्नोत्तराणि | 06 | – | – | – | 01 | – | 01 |
| 12 | कारकप्रयोगः | 05 | – | – | 01 | | | 01 |
| 13 | कविपरिचयः | 04 | – | 01 | – | – | – | 01 |
| 14 | सङ्केताधारितम् अनुच्छेदलेखनम् | 04 | – | 01 | – | – | – | 01 |
| 15 | सुभाषितम् | 04 | – | 01 | – | – | – | 01 |
| 16 | रिक्तस्थानमाध्यमेन लघुकथानिर्माणम् /रिक्तस्थानपूर्तिः | 04 | – | 01 | – | – | – | 01 |
| 17 | संस्कृतसाहित्यपरिचयः | 04 | – | 01 | – | – | – | 01 |
| 18 | अपठितांशः | 05 | – | – | 01 | – | – | 01 |
| 19 | गद्यम् | 08 | – | 02 | – | – | – | 02 |
| 20 | पद्यम् | 08 | – | 02 | – | – | – | 02 |
| 21 | पत्रलेखनम् | 04 | – | 01 | – | – | – | 01 |
| 22 | निबंधलेखनम् | 10 | – | – | – | – | 01 | 01 |
| | पूर्णयोगः | 100 | 26 | 12 | 02 | 01 | 01 | 42 |

निर्देशः – प्रश्नपत्रे प्रायः विंशतिः प्रश्नाः भविष्यन्ति। प्रश्नेषु उपप्रश्नाः अपि विधेयाः।
पञ्चविंशतिः अङ्कानाम् वस्तुनिष्ठप्रश्नाः अनिवार्याः भविष्यन्ति।

**प्रादर्श–प्रश्नपत्रम्**
**विषयः – संस्कृतम् (सामान्यम्)**
**कक्षा – द्वादशी (XII)**

समय : घण्टात्रयम् पूर्णाङ्काः – 100

---

**– निर्देशः सर्वे प्रश्नाः अनिवार्याः।**

**– प्रश्नानां सम्मुखे अङ्काः प्रदत्ताः।**

**प्र. 1 उचितविकल्पं चित्वा लिखत –** **1 x 7**

(क) ''दिगम्बरः'' अस्य पदस्य सन्धिविच्छेदः अस्ति –

(अ) दिग्+अम्बरः (ब) दिगम् + बरः

(स) दिक् + अम्बरः (द) दि + गम्बरः

(ख) ''प्रत्येकः'' इत्यस्मिन् पदे सन्धिः अस्ति –

(अ) गुणसन्धिः (ब) यण्सन्धिः (स) दीर्घसन्धिः (द) वृद्धिसन्धिः

(ग) ''मनः+हरः'' इत्यस्य सन्धिः अस्ति –

(अ) मनहरः (ब) मनाहरः (स) मनेहरः (द) मनोहरः

(घ) ''अशिवम्'' इत्यस्मिन् पदे समासः अस्ति –

(अ) तृतीयातत्पुरूषः (ब) पञ्चमीतत्पुरूषः (स) नञ्तत्पुरूषः (द) चतुर्थीतत्पुरूषः

(ङ.) ''सौन्दर्यबोधः'' अस्मिन् पदे समासः अस्ति –

(अ) कर्मधारयः (ब) तत्पुरूषः (स) द्वन्द्वः (द) बहुब्रीहिः

(च ) ''महाराजः'' इत्यस्य समासविग्रहः अस्ति –

(अ) महान् चासौ राजा (ब) महान् राजा

(स) महा चासौ राजा (द) महा राजा

(छ) ''प्रतिदिनम्ः'' इत्यस्य समासविग्रहः अस्ति –

(अ) प्रतिदिनम् इति (ब) दिनं दिनम् (स) प्रत्येकं दिनम् (द) प्रति दिनम्

**2) (क)** अधोलिखितेषु अव्ययम् अस्ति। **1 x 4**

(अ) वृक्षः (ब) प्रातः (स) गच्छति (द) भवनम्

(ख) ''पराजयः'' पदे उपसर्गः अस्ति –

(अ) जयः (ब) पर (स) परा (द) प्र

(ग) ''बालकः पुनः मोदकम् इच्छति 'इत्यस्मिन् वाक्ये अव्ययम् अस्ति –

(अ) मोदकम् (ब) बालकः (स) इच्छति (द) पुनः

(घ) ''अधोलिखितेषु'' अव्ययम् नास्ति –

(अ) अत्र (ब) पत्रम् (स) तत्र (द) कुत्र

3) (क) 'भविष्यति' इत्यत्र लकारः अस्ति – 1 x 3

(अ) लट्लकारः (ब) लृट्लकारः (स) लङ्लकारः (द) लोट्लकारः

(ख) '''जानासि' अस्मिन पदे पुरूषः अस्ति –

(अ) उत्तमपुरूषः (ब) प्रथमपुरूषः (स) मध्यमपुरूषः

(ग) ''ददति' इत्यत्र वचनम् अस्ति –

(अ) बहुवचनम् (ब) एकवचनम् (स) द्विवचनम्

4) (क) 'अधोलिखितेषु' 'तुमुन्' प्रत्ययः अस्ति – 1 x 4

(अ) पठित्वा (ब) पठितः (स) पठितुम् (द) पठितव्यम्

(ख) ''सामाजिकः'' अस्मिन पदे प्रत्ययः अस्ति –

(अ) ठक् (ब) इनि (स) अण् (द) मतुप्

(ग) ''श्रीमती' पदे प्रत्ययः अस्ति –

(अ) टाप् (ब) ङीप् (स) क्त्वा (द) मयट्

(घ) 'अम्' प्रत्ययः अस्ति –

(अ) तिङ्प्रत्ययः (ब) कृत्प्रत्ययः (स) सुप्प्रत्ययः (द) स्त्रीप्रत्ययः

5) (क) 'सलिलम्' इत्यस्य पर्यायशब्दः अस्ति – 1 x 5

(अ) जलम् (ब) कुलम् (स) अलम् (द) वायुः

(ख) ''सज्जनः'' इत्यस्य विलोमशब्दः अस्ति –

(अ) मूर्खः (ब) दुर्जनः (स) प्रियजनः (द) दुष्टः

(ग) ''वह्निः' इत्यस्य पर्यायशब्दः नास्ति –

(अ) तरूः (ब) हुताशनः (स) अग्निः (द) अनलः

(घ) अल्पारम्भः ..................................।

(अ) दुःखकरः (ब) क्षेमकरः

(ङ) पण्डितोऽपि वरं शत्रुर्न ....................... हितकारकः।

(अ) मूर्खो (ब) पण्डितो

6) (क) 'विदुषा' इत्यस्मिन पदे विभक्तिः अस्ति – 1 x 3

(अ) प्रथमा (ब) तृतीया (स) चतुर्थी (द) षष्ठी

(ख) ''अधोलिखितेषु'' सप्तमी अस्ति –

(अ) जन्मनः (ब) जन्म (स) जन्मनि (द) जन्मने

(ग) ''आत्मानौ' इत्यत्र वचनम् अस्ति –

(अ) द्विवचनम् (ब) एकवचनम् (स) बहुवचनम्

**प्र. 7 युग्ममेलनं कुरूत –** **1 x 4**

| अ | | आ |
|---|---|---|
| क. अदीनाः | – | यशः परेषाम् |
| ख. यज्ञाद् भवति | – | दर्शितम् |
| ग. तत्पदम् | – | स्याम |
| घ. यो विद्यया हन्ति | – | पर्जन्यः |

**प्र. 8 अधोलिखितप्रश्नानाम् उत्तराणि एकपदेन लिखत –** **4**

(क) कस्यै नमो नमः ?

(ख) प्रथमे वयसि कौ सेवनीयौ ?

(ग) गङ्गालहरी केन निर्मिता ?

(घ) कण्वस्य पुत्र्याः नाम किम् ?

**प्र. 9 अधोलिखितप्रश्नानाम् उत्तराणि एकवाक्येन लिखत –** **6**

(क) मनस्वी कार्यार्थी किं् न गणयति ?

(ख) लोकसङ्ग्रहार्थं कथं कर्म करणीयम् ?

(ग) कः न क्रुध्यति ?

**प्र. 10 अधोलिखितगद्यांशौ पठित्वा प्रश्नानाम् उत्तराणि लिखत –** **2 x 4**

(क) परस्मिन् क्षणे महाराजः सत्यव्रतः पुरूषमेकं गच्छन्तं दृष्टवान्। तदा तं पुरूषमाहूय – अयि! भो! कस्त्वं ? कुतो मम भवनं त्यक्त्वा गच्छसि? महाराज! मम नाम त्यागः। धने निष्क्रान्ते त्यागस्य कथं योगः? अतो मयापि गन्तुमेव सङ्कल्पितम्। ममापि प्रयच्छतु निर्गमनानुमतिं कृपया भवान् इति स पुरूषः उक्तवान्। महाराजः तमपि झटिति निर्गन्तुमङ्गीचकार।

(क) महाराजः पुरुषमाह्वय किम् उक्तवान् ?

(ख) परस्मिन् क्षणे महाराजः कं दृष्टवान ?

(ग) पुरूषः महाराजं किम् उक्तवान् ?

(घ) महाराजः झटिति किं कृतवान् ?

(ख) पाडलपुनगरे देवशर्मोणे द्विजस्य सोमशर्मा सुतोऽभूत्। स दक्षिणदिशि सरस्वतीलब्धप्रसादचंगदेवगुरोः पार्श्वेः षोडशवर्षाणि याक्ता चतुर्दशविद्याः साङ्गोपाङ्गा अधीत्य बहुपरिवारोपेतस्तं गुरूमुत्कलाप्य स्वकीयपुरं प्रति चचाल। गुरूणा शिक्षा दत्ता। यथा–भोस्त्वया भरटकानां सङ्गतिर्न कार्या ग्रामभट्टानां च ।

(क) केन शिक्षा दत्ता ?

(ख) कस्य सोमशर्मा सुतोऽभूत् ?

(ग) पुरूषः गुरूमुत्कलाप्य किं प्रति चचाल ?

(घ) पुरूषः कस्य पार्श्वे चतुर्दशविद्याः अधीतवान् ?

**प्र. 11 अधोलिखितपद्यांशौ पठित्वा प्रश्नानाम् उत्तराणि लिखत – 2 x 4**

(क) आत्मा त्वं गिरिजामतिः सहचराः प्राणाः शरीरं गृहम्
पूजा ते विषयोपभोगरचना निद्रासमाधिस्थितिः।
सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरः।
यद्यत्कर्म करोमि तत्तदखिलं शम्भो। तवाराधनम् ।।

(क) ते पूजा का ?

(ख) सर्वाः गिरः कानि ?

(ग) समाधिस्थितिः का ?

(घ) शम्भोः अखिलम् आराधनं किम् ?

(ख) मानं हित्वा प्रियो भवति,
क्रोधं हित्वा न शोचति।
कामं हित्वाऽर्थवान् भवति
लोभं हित्वा सुखी भवेत्।।

(क) कं हित्वा न शोचति ?

(ख) कामं हित्वा कथं भवति ?

(ग) मानं हित्वा कथं भवति ?

(घ) कं हित्वा सुखी भवेत् ?

**प्र. 12 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभाषितद्वयं लिखत – 4**

**प्र. 13 (क) प्रदत्तैः शब्दैः रिक्तस्थानपूर्तिं कुरूत –** **4**

(श्रीगुरवे, अन्नसम्भवः, शरदः, प्रशान्तम्)

(क) जीवेम ...................... शतम् ।

(ख) न वैरमुद्दीपयति ....................।

(ग) तस्मै ......................... नमः ।

(घ) पर्जन्याद् ........................... ।

**प्र. 14 पञ्च – अशुद्धकारकवाक्यानां शुद्धिः करणीया –** **5**

(क) चन्द्रेण परितः ताराः वर्तन्ते ।

(ख) शिक्षकाय सह छात्राः भ्रमन्ति ।

(ग) सरस्वतीं नमः ।

(घ) बालकात् मोदकं रोचते ।

(ङ) मोहनः काव्यलेखनस्य निपुणः अस्ति।

**प्र. 15 अधोलिखितेषु एकस्य कवेः संङ्क्षिप्तपरिचयं लिखत –** **4**

(क) भारविः (ख) कालिदासः (ग) वेदव्यासः

**प्र. 16 प्रदत्तैः शब्दैः अनुच्छेदलेखनं कुरूत –** **4**

(षट्, भवति, प्रमोदो, नृत्यन्ति, वसन्तः, उत्सवौ, नराः, पूर्णिमायां, हर्षातिरेकेण)

भारते ........ऋतवः सन्ति। तेषु ............ ऋतुराजः कथ्यते। चैत्रे वैशाखे च मासे वसन्तः। वसन्तौ द्वौ प्रमुखौ ................ भवतः वसन्तोत्सवः होलिकोत्सवः च। वसन्तोत्सवे सर्वत्र ................भवति। ................. नार्यश्च सर्वत्र गायन्ति ........... च। होलिकोत्सवः फाल्गुनमासस्य ...... भवति। ................. नराः, नार्यः, युवानः, वृद्धाः, बालकाश्च प्रसन्नाः भवन्ति।

**प्र. 17 अधोलिखितेषु एकस्य साहित्यिकं परिचयं लिखत** **4**

(क) रामायणम् (ख) महाभारतम् (ग) पुराणम्

**प्र. 18 अधोलिखत–अपठितगद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत।** **5**

'दहेज' अथवा 'दायज' इति शब्दः समाजस्य एकः कलङ्कः अस्ति। विवाहः जीवनस्य एकः अमूल्यः निधिरस्ति। विवाहस्य जीवनेन सह अभिन्नः सम्बन्धः अस्ति। ''दहेज'' इत्यस्य कारणेन निर्धनानां कन्यकाः बहुकालम्

अविवाहिताः भवन्ति। पुरा इयं प्रथा अस्माकं देशे प्रचलिता नासीत्। अद्यतु इयं प्रथा अस्माकं समाजे दृढपरम्परा विद्यते। एकतः पिता स्वकन्यां महादानमिव वराय यच्छति अपरतः पुनः रूप्यकाणि अपि प्रददाति। किमर्थम् एतावान् महाराशिः शुल्कं वा कन्यायाः पित्रा दीयेत ? अयमेव विचारणीयः प्रश्नः।

(क) जीवनस्य अमूल्यः निधिः कः ?

(ख) किमर्थं निर्धनानां कन्यकाः बहुकालम् अविवाहिताः भवन्ति ?

(ग) विवाहस्य केन सह अभिन्नः सम्बन्धः अस्ति ?

(घ) अपठितांशस्य उचितं शीर्षकं लिखत –

**प्र. 19 स्वस्य स्थानान्तरणप्रमाणपत्रं स्वीकर्तुं स्वस्य प्राचार्यस्य कृते एकं प्रार्थनापत्रं लिखत– 4**

अथवा

**भ्रमणार्थं गमनाय स्वस्य मित्रस्य कृते एकं पत्रं लिखत –**

**प्र. 20 अधोलिखितेषु एकस्मिन् विषये शतशब्देषु संस्कृते निबन्धं लिखत – 10**

(क) अस्माकं देशः (ख) परोपकारः

(ग) संस्कृतभाषायाः गौरवम् (घ) ग्राम्यजीवनम्।

**प्रादर्श – उत्तरपत्रम्**
**विषय :– संस्कृतम्**
**कक्षा – द्वादशी (XII)**

समय :– घण्टात्रयम् पूर्णाडकाः–100

---

**उत्तर –1**

(क) – (स) दिक् + अम्बरः
(ख) – (ब) यण्सन्धिः
(ग) – (द) मनोहरः
(घ) – (स) नञ्तत्पुरूषः
(ङ.) – (ब) तत्पुरूषः
(च) – (अ) महान् चासौ राजा
(छ) – (ब) दिनं दिनम्

**उत्तर –2**

(क) – (ब) प्रातः
(ख) – (स) परा
(ग) – (द) पुनः
(घ) – (ब) पत्रम्

**उत्तर –3**

(क) – (ब) लृट्लकारः
(ख) – (स) मध्यमपुरूषः
(ग) – (अ) बहुवचनम्

**उत्तर –4**

(क) – (स) पठितुम्
(ख) – (अ) ठक्
(ग) – (ब) ङीप्
(घ) – (स) सुप्प्रत्ययः

**उत्तर –5**

(क) – (अ) जलम्
(ख) – (ब) दुर्जनः
(ग) – (अ) तरूः
(घ) – (ब) क्षेमकरः
(ङ.) – (अ) मूर्खो

**उत्तर –6**

(क) – (ब) तृतीया
(ख) – (स) जन्मनि
(ग) – (अ) द्विवचनम्

**उत्तर –7**

| | (अ) | | (आ) |
|---|---|---|---|
| | (क) अदीनाः | – | स्याम |
| | (ख) यज्ञाद् भवति | – | पर्जन्यः |
| | (ग) तत्पदम् | – | दर्शितम् |
| | (घ) यो विद्यया हन्ति | – | यशः परेषाम् |

**उत्तर –8** (क) वाण्यै।
(ख) नियमसंयमौ।
(ग) पण्डितराजगन्नाथेन।
(घ) शकुन्तला।

**उत्तर –9** (क) मनस्वी कार्यार्थी दुःखं सुखं च न गणयति।
(ख) लोकसंङ्ग्रहार्थं कर्तव्यरूपं कर्म करणीयम्
(ग) पण्डितः न क्रुद्ध्यति।

**उत्तर –10 (क)**
(क) अयि भो! कस्तवम् ? कृतो मम भवनं व्यक्त्वा गच्छसि ?
(ख) परस्मिन् क्षणे महाराजः स्त्यव्रतः पुरूषमेंकं गच्छन्तं दृष्टवान्।
(ग) पुरूषः उक्तवान्–महाराज! मम नाम त्यागःधने निष्क्रान्ते त्यागस्य कथं योगः।
(घ) महाराजः झटिति निर्गन्तुमङ्गीचकार ।

**उत्तर 10 (ख)**
(क) चंगदेवेन शिक्षा दत्ता।
(ख) सोमशर्मा देवशर्मणो द्विजस्य सुतोऽभूत ।
(ग)पुरूषः गुरूमुकलाप्य स्वकीयपुरं प्रति चचाल।
(घ) पुरूषः च्ंगदेवगुरोः पार्श्वे चतुर्दशविद्याः अधीतवान्।

**उत्तर–11 (क)**
(क) विषयोपभोगरचना ते पूजा।
(ख) सर्वाः गिरः स्तोत्राणि।
(ग) निद्रा समाधिस्थितिः।
(घ) यद्यदहं कर्म करोमि तत्तदखिलं शम्भोः आराधनम्।

**उत्तर 11 (ख)**
(क) क्रोधं हित्वा न शोचति ।
(ख) कामं हित्वा अर्थवान् भवति ।
(ग) मानं हित्वा प्रियो भवति।
(घ) लोभं हित्वा सुखी भवेत्।

**प्रशन 12** प्रत्येकशुद्धसुभाषितस्य कृते अङ्कद्वयं निर्धारितम्!

**उत्तर–13** (क) शरदः
(ख) प्रशान्तम्
(ग) श्रीगुरवे
(घ) अन्नसम्भवः

**उत्तर 14**
(क) चन्द्रं परितः ताराः वर्तन्ते।
(ख) शिक्षकेन सह छात्राः भ्रमन्ति।
(ग) सरस्वत्यै नमः।
(घ) बालकाय मोदकं रोचते।
(ङ) मोहनः काव्यलेखने निपुणः अस्ति ।

**उत्तर 15** कवेः संक्षिप्तपरिचयं रचनादिकं च दृष्टवा चतुर्अङ्काः प्रदेयाः।

**उत्तर 16** भारते षट् ऋतवः सन्ति। तेषु वसन्तः ऋतुराजः कथ्यते। चैत्रे वैशाखे च मासे वसन्तः भवति । वसन्तौ द्वौ प्रमुखौ उत्सवौ भवतः वसन्तोत्सवः होलिकोत्सवः च। वसन्तोत्सवे सर्वत्र प्रमोदो भवति। नराः नार्यश्च सर्वत्र गायन्ति नृत्यन्ति च। होलिकोत्सवः फाल्गुनमासस्य पूर्णिमायां भवति। हर्षातिरेकेण नराः, नार्यः, युवानः, वृद्धाः, बालकाश्च प्रसन्नाः भवन्ति।

**उत्तर 17** सम्पूर्णशुद्धपरिचयस्य कृते चतुर्अङ्काः, निर्धारिताः।

**उत्तर 18** (क) विवाहः जीवनस्य अमूल्यः निधिः अस्ति।
(ख) 'दहेज' इत्यस्य कारणेन निर्धनानां कन्यकाः बहुकालम् अविवाहिताः भवन्ति।
(ग) 'दहेज' अथवा 'दायज' इति शब्दः समाजस्य एकं कलङ्कम् अस्ति।
(घ) विवाहस्य जीवनेन सह अभिन्नः सम्बन्धः अस्ति।
(ङ) अपठितांशस्य उचितः शीर्षकः 'दहेजप्रथा' इत्यस्ति ।

**उत्तर 19** पत्रे सङ्केतं सम्बोधनं दिनाङ्कं भाषादिकं च दृष्ट्वा शुद्धपत्रस्य कृते चत्वारः अङ्काः प्रदानीयाः ।

**उत्तर 20** सम्पूर्णशुद्धनिबन्धस्य कृते दश अङ्काः निर्धारिताः सन्ति।